Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५६३२ - घ

Title संदरीकवचम

Author

Extent ३९ Age

Subject तन्त्रम · सम्पूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५६३२-घ

सुंदरीकवचम प्रत्यंगीरासूक्तविधानम
(तन्त्राम)
पत्राणि ३१ (सम्पूर्णम)

नं० ११६६

59

© Dharmartha Trust J&K. Digitized by eGangotri

5632

F-31

Complete

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५६३२-घ

ॐ श्रीगुरवे नमः ॐ नमः शिवाय ॐ नमस्कृत्य महेशानं विश्वव्यापिनमीश्वरं वक्ष्ये शिवम
यं वर्म सर्वरक्षाकरं नृणां शुचौ देशे समासीनो यथावत्कल्पितासनः जितेंद्रियो जितप्रा
णः चिंतयेच्छिवमव्ययं हृत्पुंडरीकांतरसंनिविष्टं स्वतेजसा व्याप्तनभोवकाशं जितें
द्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशं ध्यानावधूताखिलकर्मबंधश्चिरं
चिदानंदनिमग्नचेताः षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षां मां पा
तु देवोखिलदेवतात्मा संसारकूपे पतितं गभीरे यन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे
सर्वमघं हृदिस्थं सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदमयश्चिदात्मा अणोरणी
यानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् यो भूस्वरूपेण बिभर्ति विश्वं पाया
त्स भूमेर्गिरिशोष्टमूर्तिः योपां स्वरूपेण नृणां करोति संजीवनं सोवतु मे जलेभ्यः
कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः स कालरुद्रोवतु मां द
वाग्नेर्वात्यादिभीतेरखिलाच्च पापात् प्रदीप्तविद्युत्कनकावभासः सदा वराभीतिकु
ठारहस्तः चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रं कुठारवेदां

© Dharmartha Trust J&K. Digitized by eGangotri

शि॰
क॰
१

कुशपाशशूलध्वकाक्षमालाहिगणान्दधानः चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो
दिशि दक्षिणस्यां कुंदेंदुशंखस्फटिकावदातो वेदाक्षमालावलयाभयांकः दिशश्चतुर्व
क्त्रतरुप्रभावः सद्योधिजातोवतु मां प्रतीच्यां वराक्षमालाभयटंकहस्तः सरोजकिंजल्क
समानवर्णः त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः वराभयेष्वंकु
शपाशशार्ङ्गकपालटंकाक्षत्रिशूलपाणिः सितद्युतिः पंचमुखोवतान्मामीशान ऊ
र्ध्वं परमप्रकाशः मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्याद्धरभालनेत्रः नेत्रे ममा
व्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः पायाछ्रुतिं मे श्रुतिगीतकीर्तिः कपो
लमव्यात्सततं कपाली वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु केतुजिह्वः कं
ठं गिरीशोवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः दोर्मूलमव्यान्मम धर्मबाहु
र्वक्षःस्थलं दक्षमखांतकोव्यान्ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतका
री हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ऊरुद्वयं पातु कुवेरमि
त्रो जानुद्वयोव्याज्जगदीश्वरो मे मां मध्ययामेवतु वामदेवः त्रियंबकः पातु तृतीय

© Dharmartha Trust J&K. Digitized by eGangotri

यामेहषखजः पातुदिनांतयामे पायान्निशादौशशिशेखरोमां गंगाधरोरक्षतुमांनिशीथे गौरीपतिः पातुनिशावसानेमृत्युंजयोरक्षतुमांप्रभाते दृहस्थितंरक्षतुशंकरोमांस्थाणुः सदापातुवहिःस्थितंमां तदंतरेपातुपतिःपशूनां सदाशिवोरक्षतुमामनंतात् तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतंप्रमथाधिनाथः वेदांतवेद्योवतुमांनिषण्णमामव्ययः पातुशिवःशयानं मार्गेषुमांरक्षतुनीलकंठः शैलादिदुर्गेषुपुरत्रयारिः अरण्यवासादिमहाप्रयासेपायान्मृगव्याधउदारशक्तिः कल्पांतकालोग्रकटुप्रकोपस्फुटाट्टहासस्खलितांडकोशः घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतुवीरभद्रः पत्त्यश्वमातंगघटावरूथिनीसहस्रलक्षायुतकोटिभीषणं अक्षौहिणीनांशतमाततायिनांछिंद्यान्मृडोघोरकुठारधारया निहंतुदस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलंत्रिपुरांतकस्य शार्दूलसिंहर्क्षमृगादिहिंस्रान्संत्रासयेदीशधनुःपिनाकः दुःस्वप्नदुःशकुनदुर्गतदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि उत्पाततापविषभीतिमसद्ग्रहार्तीव्याधींश्चनाशयतमेजगतामधीशः ॐनमोभगवतेसदा

© Dharmartha Trust J&K. Digitized by eGangotri

शि॰
क॰
२

शिवाय सकलतत्त्वात्मकाय सकलतत्त्वविभूताय सकललोकैककर्त्रे सकललोकैक
हर्त्रे सकलनिगमगुह्याय सकललोकैकवरप्रदाय सकलदुरितार्तिभंजनाय
सकलजगदभयंकराय शशांकशेखराय शाश्वतनिजावासाय निरामयाय निरा
तंकाय निष्कलाय निरावासाय निराहाराय निष्प्रपंचाय निर्द्वंद्वाय निःसंगाय नि
र्गुणाय निरुपमविभवाय निराधाराय नित्यशुद्धपरिपूर्णचिदानंदानंताद्वयपर
मशांत प्रकाशायतेजोरूपाय जयजय महारुद्र भवावतार महाभैरव खट्वांग
खड्गचर्म पाशांकुश डमरुत्रिशूल चापबाणासिगदाशक्तिभिंडिपाल तोमर
मुद्गर प्रास परिघ भुशुंडि शतघ्नी चक्रायुध भीषणाकर सहस्रमुख दंष्ट्राकरा
ल विकटाट्टहास विस्फारित ब्रह्मांडमंडल नागेंद्रमंडले मृत्युंजय त्रनेतकांत
क कामांतक त्रिपुरांतक विरूपाक्ष विश्वरूप विश्वेश्वर वृषभवाहन विषभूषण
बहुभूषण विश्वतोमुख सर्वतोमुख सर्वतोरक्ष २ मांज्वल २ महामृत्युमपमृत्युभयं
नाशय २ चौरान्नाशय २ शत्रूनुच्चाटय २ त्रिशूलेनविदारय २ कुठारेणभिंधि २ ख

© Dharmartha Trust J&K. Digitized by eGangotri

हुंगेनविपोथय २ भूतानिविद्रावय २ कूष्मांडवेतालमारीगणब्रह्मराक्षसगणान्त्र
त्रासय २ ममाभयंकुरु २ विश्वस्तमाश्वासय २ दुःस्वान्तरंममानंदय २ द्वयार्तिंनिवार
य २ नरकभयान्मामुद्धारय २ शिवकवचेनमामाच्छादय २ ॐसदाशिवायनमोनम
स्ते वृषभउवाच इतीदंकवचंशैवंपरमंव्याहृतंमया सर्वबाधाप्रशमनंरहस्यंसर्व
देहिनां यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमं ननस्यजायतेक्वापिभयंशंभोरनु
ग्रहात् क्षीणायुःप्राप्तमृत्युर्वामहारोगहतोपिवा देहांतेमुक्तिमाप्नोतिशिववर्मा
नुभावतः सद्यःसुखमवाप्नोति दीर्घमायुश्चविंदति सर्वदारिद्र्यशमनंसर्वमंगल्यव
र्धनं योधत्तेकवचंशैवंसदेवैरपिपूज्यते महापातकसंघातैर्मुच्यतेचोपपातकैः
देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः इतिश्रीशिवकवचस्तोत्रंसमाप्तम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

15

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

प्र. ॐ श्रीगुरुभ्यो नमः ॐ ब्रह्मलोके सुखासीनं सर्वलोकगुरुं शिवं सर्वदेवमयं
साक्षात्सर्वतेजोमयं परं १ सर्वविद्यापरं शास्त्रतत्त्वज्ञानोपायाग्रणीं वेदहरं प्रण[illegible] स म्य
16 र्वदेवाश्च ऋषयः प्रष्टुमागताः २ वसिष्ठो वामदेवश्च जाबालिः कपिलस्तथा ना
रदश्च शुकः कण्वो विश्वामित्रश्च कश्यपः ३ वात्स्यायनो त्रिः शांडि ऋचीको ल्य
देवलो बुधः अगस्त्यश्च पुलस्तिश्च दुर्वासारण्यकादयः एवमादिमुनींद्राणां
वृंदमध्ये पितामहं ४ पप्रच्छ च मुनिश्रेष्ठः शौनको सुमहातपाः अथर्वणस्य मा
हात्म्यं यथावद्वक्तुमर्हसि ५ उवाच तस्मै देवेशो रहस्यं परमं शिवं सर्वदेवमयं
साक्षादाथर्वणमिहोच्यते ६ तदग्रे मंत्रभागेषु प्रत्यंगिरा समुच्यते चत्वारिंश
द्वानुष्टुप्सुष्टऋग्भिश्च पंचभिः गुह्याद्गुह्यतरं साक्षात्त्रैलोक्यविजयं परं शिव
लोके मया लब्धं समाहितमनाः शृणु ७ शांतौ पुष्टौ च हृष्टौ च अपमृत्युभये तथा
आभिचारिककृत्यायां शांतौ प्रत्यभिचारिके ८ निग्रहानुग्रहे चैव सर्वपापहरं सु
मं भूतप्रेतपिशाचादिग्रहपीडानिवारणं ९ गजाश्वयोः प्रशांतिः स्यात्राष्ट्रशां

© Dharmartha Trust J&K. Digitized by eGangotri

निज्वरापहं स्वदेशभ्रंशनाशं च परचक्रभयापहं ११ सर्वशत्रुक्षयकरं हस्तिस्तंभ
निवारणं उत्पातशांतिर्देवानां कोपशांतिस्तथैव च १२ ग्रहशांतिः रोगशांतिः कृ
त्याशांतिस्तथैव च एवमादीनि कर्माणि सिध्यंति च फलंति च ऊलङ्घयविष्णुह्यात्मा
मंत्रार्थज्ञानकोविदः १३ शांतिबुद्धिप्रसन्नात्मा जितक्रोधो जितेन्द्रियः दंभाहं
कारमोहादिरहितो ज्ञानवित्तमः ध्यानयोगसमारूढः सर्वाभीष्टप्रदायकः मे
त्रं मांगिरसं लब्ध्वा सपकः सर्वविज्जयी विनियोगमथो वक्ष्ये चत्वारिंशद्धचोग
णैः प्रत्यंगिरायामंत्रस्य ऋषिरंगिराः प्रकीर्तितः छंदोनुष्टुप्समाख्यातं प्रत्यंगि
रा महोदया १४ उग्रा च कृत्या देवी स्यात्सर्वारिष्टविनाशिनी विनियोगोत्र सर्वेष
कार्येषु च तथाविधः १७ कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि तन्नो दुर्गा प्र
चोदयात् दशवारं जपित्वा ततः स्वात्मरक्षां कुर्यात् लक्षयेत्प्रत्यरीन्सर्वान् ब्राह्म
णे नैव योजयेत् प्रयुक्तो ब्राह्मणे मंत्रो विपरीतफलप्रदः १५ तत्रादौ शरीरशो
धनार्थे प्राजापत्यं चरेत् कुशोदकेन पंचगव्येन वा चरुहविष्याशी दिनत्रये स्म

© Dharmartha Trust J&K. Digitized by eGangotri

प्र०

ष्टोत्तरशतं जपेत् कृतपुरश्चरणो भवेत् यां कल्पयंतीति पंचऋग्मंत्रं तेकृते कृस्मा

दरेअंगुष्ठाभ्यां नमः पुनर्मंत्रं पठेत् सिंहवाहिनीतर्जनीभ्यां नमः मंत्रं पठेत् महा

वलेमध्यमाभ्यां नमः मंत्रं महाभैरवी अनामिकाभ्यां नमः मंत्रं सर्वपरकृत्योच्छे

दिनीकनिष्ठिकाभ्यां नमः मंत्रं पठेत् सर्वपरमंत्रोच्छेदनी करतलकरपृष्ठाभ्यां

मंत्रंपठेत् नमः एवं हृदयादि सिंहीसिंहमुखीसखीभगवतः प्रोत्फुल्लनेत्रोज्वलां शूलस्थू

लकपालपाशडमरुव्यग्राग्रहस्तोद्भुजां दंष्ट्राकोटिलसत्कटाक्षकुहराभारक्त

नेत्रत्रयां वालेंदूज्वलमौलिकां भगवतीं प्रत्यंगिरां भावये इति ध्यात्वा ततो दुर्गा

गायत्रीं जपेत् ॐ ह्रीं कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि तन्नो दुर्गा प्रचोदया

त् इति गायत्रीं दशवारं जपित्वा ततः आत्मरक्षां कुर्यात् तद्यथा ॐ दुर्गां देवीं शर

णमहं प्रपद्ये अवधवत्पविषो जहि ॐ क्षों क्षीं कृष्णवाससे सिंहवदने महाभैरवि ज्व

लज्ज्वालाजिह्वे करालवदने प्रत्यंगिरे क्ष्म्रीं स्वाहा ॐ नमो नारायणाय घृणिः सूर्य आ

दित्यों ॐ सहस्रारहुंफट् स्वाहा यो मइत्यादि मंत्राणां प्रत्यंगिराऋषिः अनुष्टुप् छंदः

© Dharmartha Trust J&K. Digitized by eGangotri

इंद्रादयोदेवताः आत्मरक्षार्थे जपेविनियोगः ॐयोमेपूर्वगतः पाप्मापापकेने
हकर्मणा इंद्रस्तंदेवोराजाजंभयतुशोचयतुस्तंभयतुतापयतुमारयतुकलिं
तस्मैप्रयच्छतुहतंममाशिवंममशुभंममशांतिःस्वस्त्ययनंममहुंफट्स्वाहा
इंद्रायनमः इंद्रोमेदेवःप्रीतोभवतु १ ॐकारःसर्वत्र इतिमंत्रेणदशादिक्षुदश
लोकपालेभ्योमाषान्नबलिंस्वस्वमंत्रेणदद्यात् ॐयतइंद्रभयामहेततोनोअभ
यंकृधि मघवञ्छग्धितवतन्नऊतिभिर्विद्विषोविमृधोजहि ॐयोमेअग्निगतःपा
प्मापापकेनेहकर्मणा अग्निस्तंदेवोराजाजंभयतुशोचयतुस्तंभयतु तापयतु
मारयतु कलिंतस्मैप्रयच्छतुहतं ममाशिवं ममशुभंममशांतिःस्वस्त्ययनं मम
हुंफट्स्वाहा अग्नयेनमः अग्निर्मेदेवःप्रीतोभवतु ॐअग्नेनयसुपथारायेअस्मा
न्विश्वानिदेववयुनानिविद्वान् युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंवि
धेम २ ॐयोमेदक्षिणागतःपाप्मापापकेनेहकर्मणा यमस्तंदेवोराजाजंभयतु
शोचयतुस्तंभयतुतापयतुमारयतुकलिंतस्मैप्रयच्छतु हतंममाशिवंममशुभं

© Dharmartha Trust J&K. Digitized by eGangotri

पु॰ ममशान्तिः स्वस्त्ययनं ममाङ्गं फट् स्वाहा यमाय नमः यमो मे देवः प्रीतो भवतु स्वर्ग
नःपाप्मा मभयं कृणोतु यस्मिन्नक्षत्रे यम एति राजा यस्मिन्नेनमभ्यषिंचंत देवास्तद
18 स्य चित्रं हविषा यजाम ३ ॐ यो मे निर्ऋतिगतः पाप्मा पापकेनेह कर्मणा निर्ऋ
तिस्त्वं देवो राजाज्ञं भयतु शोषयतु स्तंभयतु तापयतु मारयतु कलिं तस्मै प्रय
च्छतु कृतं मम शिवं मम शुभं ममशान्तिः स्वस्त्ययनं ममाङ्गं फट् स्वाहा निर्ऋतये न
मः निर्ऋतिर्मे देवः प्रीतो भवतु ॐ यस्त्वं नमयजमानमिच्छसि तेनस्येयां नस्क
रस्यान्वेषि ग्रन्यमस्मदिच्छसादद्यात्वा नमो देव निर्ऋते तुभ्यमस्तु ४ ॐ यो मे पश्चि
मगतः पाप्मा पापकेनेह कर्मणा वरुणस्त्वं देवो राजाज्ञं भयतु शोषयतु स्तंभ
यतु तापयतु मारयतु कलिं तस्मै प्रयच्छतु कृतं मम शिवं मम शुभं ममशान्तिः
स्वस्त्ययनं ममाङ्गं फट् स्वाहा वरुणाय नमः वरुणो मे देवः प्रीतो भवतु ॐ इमं
मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ५ ॐ यो मे वायुगतः पाप्मापा
पकेनेह कर्मणा वायुस्त्वं देवो राजाज्ञं भयतु शोषयतु स्तंभयतु तापयतु मारय

© Dharmartha Trust J&K. Digitized by eGangotri

तुकलिंतस्मैप्रयच्छतु कृंतंममशिवंममशुभंममशांतिःस्वस्त्ययनंममङ्गंफट्स्वा
हा वायवेनमःवायुर्मेदेवःप्रीतोभवतु ॐवायोःशतंहरीणांयुवस्वयोस्याणां उत
वातेसहस्रिणोरथआयातुपानसा ८ ॐयोमेउत्तरगतःपाप्मापापकेनेहकर्मणा
सोमस्तंदेवोराजाज्जंभयतुशोषयतुस्तंभयतुतापयतुमारयतुकलिंतस्मैप्रयच्छ
तुकृंतंममशिवंममशुभंममशांतिःस्वस्त्ययनंममङ्गंफट्स्वाहा सोमायनमः सो
मोदेवःप्रीतोभवतु ॐवयंसोमव्रतेतवमनस्तनूषुबिभ्रतःप्रजावंतःसचेमहि ७
योमेईशानगतःपाप्मापापकेनेहकर्मणा ईशानस्तंदेवोराजाज्जंभयतुशोषय
तुस्तंभयतुतापयतुमारयतु कलिंतस्मैप्रयच्छतुकृंतंममशिवंममशुभं ममशां
तिःस्वस्त्ययनंममङ्गंफट्स्वाहा ईशानायनमः ईशानोमेदेवःप्रीतोभवतु ॐत
मीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं पूषानोयथावेदसामस
द्वृधेरक्षितापायुरदब्धःस्वस्तये ८ ॐयोमेऊर्ध्वगतःपाप्मापापकेनेहकर्मणाब्र
ह्मातंदेवोराजाज्जंभयतुशोषयतुस्तंभयतुतापयतुमारयतुकलिंतस्मैप्रयच्छतु

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ हृतंममशिवंममशुभंममशांतिःस्वस्त्ययनंममहूंफट्स्वाहा ब्रह्मणेनमः ब्रह्मामे
19 देवःप्रीतोभवतु ॐब्रह्मजज्ञानंप्रथमंपुरस्ता ड्वसीमंतःसुरुचोवेनआवः सबु
ध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ९ ॐयोमेभूमिगतःपापापा
पकेनेहकर्म्मणा भूमिस्त्वंदेवीराज्ञीजंभयतुशोषयतुस्तंभयतुतापयतुमार
यतुकलिंतस्मै हृतंममशिवंममशुभं ममशांतिःस्वस्त्ययनंममहूंफट्स्वाहा
पृथिव्यैनमः ॐपृथिवीमेदेवीप्रीताभवतु ॐस्योनापृथिवीभवान्तृक्षरानिवेशनी
यच्छानःशर्मसप्रथः १० ॐयोमेन्तरिक्षगतःपापापापकेनेहकर्म्मणा वायुस्त्वंदेवो
राजाजंभयतुशोषयतुस्तंभयतुतापयतुमारयतुकलिंतस्मैप्रयच्छतुहृतंममशि
वंममशुभं ममशांतिःस्वस्त्ययनंममहूंफट्स्वाहा वायवेनमः वायुर्मेदेवःप्रीतो
भवतु अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः यःशंसतेस्तुवतेधायि
पज्रइंद्रज्येष्ठाअस्माःअवंतुदेवाः ११ ॐयोमेआकाशगतःपापापापकेनेहकर्म्म
णा आकाशस्त्वंदेवोराजाजंभयतुस्तंभयतुतापयतुमारयतुकलिंतस्मैप्रयच्छतु

© Dharmartha Trust J&K. Digitized by eGangotri

हृतंममषिवंममशुभंममशांतिःस्वस्त्ययनंममइंफट्स्वाहा द्यौर्नमः ॐद्यौर्मेदेवी
प्रीतोभवतु ॐअग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याअयं अपांरेतांसिजिन्वति १२ ॐ
योमेसर्वगतःपापात्पापकेनेहकर्मणाविष्णुस्तंदेवोराजा जंभयतुशोषयतुस्तं
भयतुतापयतुमारयतुकलिंतस्मैप्रयछतुहृतंममशिवंममशुभंममशांतिःस्व
स्त्ययनंममइंफट्स्वाहा विष्णवेनमः विष्णोर्मेदेवःप्रीतोभवतु ॐइदंविष्णुर्विचक्र
मेत्रेधानिदधेपदं समूढमस्यपांसुरे १३ इतिदिग्बंधनमात्मरक्षांवकृत्वाततोजप
मारभेत् ततस्तात्रमयंमृन्मयंवाकलशंस्थाप्यपयसाक्षीरेणवापूर्यशांत्यादिषु
प्रत्यभिचारेष्वाज्येनपूरणं शत्रूणामभिचारे आयसःकलशःसार्षपतैलेनपूरणी
यः तत्रधातुमयींवासुवर्णकमयीं प्रतिमांविधाय महोपचारैःपूजयेत् शांतौवा
गिरसाउपचाराः अभिचारे आसुराः उपचाराःआयसीप्रतिमाविभीतकधादारुमयी ˇसप्तधातुमयीˇ
वाहृत्सुवर्णकर्ममयीवाभवति राज्ञोकर्म दक्षिणाभिमुखः प्रत्यङ्मुखोवाजुहुयात
पलेनदर्भाद्भिमितेसुवर्णंचतुर्ग्रुणंरजतंअग्राक्तौ शांत्यादिकार्येषुतयोरभावादाग्रे

© Dharmartha Trust J&K. Digitized by eGangotri

अ· णिऊर्यांतास्त्रप्रतिमांगिरायाः आवाहनादिदक्षिणांते महाराजोपचारैःसंपूज्य अहो
रात्रमविच्छिन्नंगोद्धृतदीपं पुरतोवस्याप्यशांतिगणंपठेदादावंतेच अभिलषितका
मंमनसिविधाय मंत्रंसूक्तंवाऋक्गणंवाजपेत् तथाचगोपथब्राह्मणे प्राङ्मु
खोवाग्यतोवर्हिष्युपविष्टःसहस्रंकृत्वाआवर्तयेत्सिध्यंत्यस्यार्थाः सर्वकर्माणि
चेतिब्राह्मणेतथाचकौशिकः सहस्रंहिगणाहन्नोमंत्राहन्नोदशायुतं सूक्तानाम
युतंप्रोक्तासंख्यानादैशिकीविधौ सर्वारिष्टेतथापुष्टौभेषज्येपौष्टिकेरिपौ मंत्रयो
गःसंप्रयुक्तःसर्वारिष्टनिवर्हणः महाव्याधौमहामायांवैध्याप्रत्यभिचारयोः प्रयो
गोसूक्तमंत्राभ्यांतथाचाद्भुतदर्शने मंत्रसूक्तगणैःकार्यराजकार्याभिचारिके अ
साध्यमपियत्किंचित्साधयेत्त्रिविधंकृतं एकंद्वित्रीणिवाऊर्ध्वादङ्गभिर्वहुधाकृतं
ग्रसहृतनाक्रियमाणेहिडःसाध्यमपिसाधयेदिति योकल्पयंतीतिमहामंत्रेसूक्तं
वाम्नुक्लाष्टमीमारभ्यपर्वपर्यंते श्रोडुंवरदंडे प्रकृष्टमात्रेधारयन्शत्रुनामसंयुक्तं
सहस्रंजपेत्शत्रुर्महारोगग्रस्तोभवति अष्टोत्तरसहस्रंपशानंवाप्रतिदिनंजपेत्

© Dharmartha Trust J&K. Digitized by eGangotri

वेतडा अर्क पिचुभिलावा

पुरतो गिरायाः शत्रुर्महाग्रहग्रस्तो भवति कृष्णप्रतिपदमारभ्य चतुर्दशी पर्यंतं
विभीतककंदंमष्टप्रादेशमात्रमादाय शत्रुनामसंपुटं जपेत् महाव्याधिगृहीतो
म्रियते च न सन्देहः अर्कसमिधः कारस्करसमिद्वा भल्लातकसमिद्वा तैला
भ्यक्ताः अष्टोत्तरसहस्रं वा अष्टोत्तरशतं हुत्वा समराजेण शत्रुज्वरयो भवति केव
लजपमात्रेण मासांते रिपुर्महाज्वराभिभूतो मृत्युमेति ईश्वरालये तालपत्रे श्म
शानकाष्ठमय्या शत्रुनामसंपुटं मंत्रे लिखित्वा श्मशानकज्जलेन लिखित्वा अ
ष्टोत्तरसहस्रं जपित्वा प्रादेशमात्रे भूम्यां निखनेत् तत्क्षणात्सर्वज्वरो भवति
ऊलज्वयो भवति यथाशक्तिगोभूस्वर्णहिरण्यादिदक्षिणां गुरवे ददाति तथा च मं
त्रान् तच्छंयोरिति मंत्रस्य बार्हस्पत्यशंयुर्ऋषिः शाक्वरीछंदः विश्वेदेवा देवता शां
त्यर्थे जपे विनियोगः ॐ तच्छंयोरावृणीमहे मनो ब्रह्मणो भद्रं नो अपि वातय मनः
ॐ शांतिः शांतिः शांतिः यां कल्पयंतीति मंत्राणां प्रत्यंगिरा ऋषिः अनुष्टुब्बृहत्यौ छं
दांसि उग्राकृत्या देवता ॐ बीजं ह्रीं शक्तिः ममाभीष्टसिध्यर्थे जपे विनियोगः ध्यानं

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·

पूर्ववत् मूलमंत्रं सहस्रं जपेत् स च अवब्रह्मद्विषो जहि ओं क्रां क्रीं क्षम्वा समे सिंह
वदने महाबले महाभैरवि ज्वलज्ज्वालाग्निजिह्वे करालवदने प्रत्यंगिरे ह्रां ह्रीं ह्रौं: ओं
नमो नारायणाय घृणिः सूर्य आदित्यों सहस्रार हुं फट् अवब्रह्मद्विषो जहि इत्यनं
ततः सहस्रं जपेत् ओं ह्रीं यां कल्पयंति नो रयः क्रूरां कृत्यां वधूमिव तां ब्रह्मणा अपनिर्ण
अप्रत्यक्कर्तारमृच्छतु ह्रीं ओं १ ओं शीर्षण्वती कर्णवती विश्वरूपां भयंकरी यः श्राद्धि
णो दिहाय त्वां चित्तं त्वं योजयाम्यभिः २ ओं येन दिष्टेह वदसि अनिकलमध्यायिनि ते
मे वेतो निवर्त्यो घमास्मात्ल्वच्छो अनागसः ३ ओं अभिवर्त स्वकर्तारं निरस्ता स्माभिरोज
सा आयुरस्य निकृंत स्वप्रजां च पुरुषादिति ४ ओं यस्त्वा कृत्ये चकारेह तं त्वं गच्छ पुन
नैवे शरातीः कृत्ये नाशय सर्वां अयातु थात्यः ५ अथ द्वितीयप्रयोगः द्विमे कृत्येति
पंचऋग्भिः कपिलाक्षीरं भुंजानो त्रिरात्रं जपेत् ब्रह्मसमो भवेत् पलाशसमिद्भिः
पयसाक्ताभिः अष्टसहस्रं जुहुयात् सप्तदिनमध्ये ग्रहदोषान् शमयति त्वद्बाधान् शम
ति शांतिर्भवति अश्वत्थसमिद्भिः यथाकामो जुहोति नदीतीरे श्मशाने रुद्रालये

© Dharmartha Trust J&K. Digitized by eGangotri

वाभस्मराशिं कृत्वा यन्नाममनसा ध्यात्वा अष्टसहस्रं जपेत् तस्य महाज्वरो भवेत्
अहोरात्रं भस्माभिमंत्रितं तस्य गात्रे प्रक्षिपेत् सर्वराज्ञां समो भवेत् वांछितपदं प्रा
प्नोति विष्णुग्रहे नित्यमष्टोत्तरसहस्रं जपेत् इष्टसिद्धिर्भवति एवं संवत्सरं जपेत्
ब्रह्मसमो भवति तिलान्दशभारदक्षिणां ददाति मंत्राः ॐ क्षिप्रे कृत्ये निवर्तस्व क
र्तुरेव गृहान्प्रति पशूंश्चैवास्य नाशय वीरांश्चास्य निबर्हय १ ॐ यस्त्वा कृत्ये प्रतिया
यविद्वानः विदुषो गृहान् तस्यैवेतः परेत्याशु नतूल्कं पिपरुष्परः २ ॐ प्रतीचीत्वा
पसेयत्नब्रह्मरो विपमित्रहा अग्निश्च कृत्ये रक्षोहा रिपुहा जपकपात् ३ ॐ यथा त्वां
गिरसः पूर्वं भगवत्स्वापसेधिरे अत्रयश्च वरिष्ठाश्च तथैव त्वापसेधयेम ४ ॐ यस्त्वे
पद्मेषि संदधौ रथस्यैव विभुर्धिया तं गच्छ तत्रेतो जनमज्ञातस्तेऽयं जनः ५ अथतृ
तीयप्रयोगः यो नः कृत्ये रणस्थो वेति पंचऋग्भिः पूर्वपक्ष प्रतिपदमारभ्य कापि
लाक्षीरं वा भैक्ष्योहारं वा चरुं वा हविष्याशी यावत्पर्वपर्यंतं जपेत् सर्वकृत्याशां
तिर्भवति अपमृत्युं जयति भूतप्रेतपिशाचादिब्रह्मराक्षसअपस्मारादियक्षगंध

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ वैविद्याधरग्रहस्कंदग्रहवाधानघ्नंति सर्वरोगानजयति उत्तरोत्तरंमहाशांतिर्भ
22 वति नित्यमष्टोत्तरशतंजपेत् यथाशक्तिर्वाजपेत् अहरहःश्रीर्वर्द्धते सर्वग्र
हवाधानघ्नंति नामसंयुक्तमष्टोत्तरसहस्रंजुहुयात् सर्वदोषानघ्नंति तैलमा
षसंयुक्तंचरुंआज्येनसंयुक्तं अष्टोत्तरसहस्रंजुहुयात् अभिचारशांतिर्भवति
तिलतंडुलपलाशजसमैर्मिश्रीकृत्यआज्याक्तैः शांतिःजिह्वायांदत्वामासमेकंस
र्वज्ञःखहरोभवति महोत्पातशांतिर्भवतिजीवेद्वर्षशतं अंगुलीयकादिस्वर्णं
दक्षिणा हस्त्यश्वगोमहिषीवादक्षिणा श्रीः ॐयोनःकृत्येरणस्योवाकश्चिद्वात्योभि
हिंसति तस्यत्विषोरिवेद्वोग्निस्तत्तत्त्वच्छस्वहेबिता १ भवाःशर्वीदेवहेडिमस्यात्विपं
तेपापकृत्वनेहरस्वतीत्वंचकृत्येमोछिमस्तस्यकिंचन २ योनःशिवासःपथानंपरा
यांतिपरावते नैर्देविराज्ञाःकृत्यानोगमयःस्वाजुचिंतये ३ योनःकश्चिद्द्वारातिर्म
नसात्यभिदासति हरस्योवांतिकस्योवातस्यत्यघमस्तकपिव ४ येनासिकृत्येप्र
हितोदष्ठेनास्मजिघांसय तस्याव्यनज्ञाव्यनञ्चाहितस्तहरसाशानिः ५ अथचत्र

© Dharmartha Trust J&K. Digitized by eGangotri

थंप्रयोगः यश्चवैविद्विषयस्मानितिपंचऋग्भिः समुद्रगामिनींनदींगत्वानित्य
मष्टोत्तरशतंजपेत् पश्चादष्टाविंशत्यंजलिनाजलंगृहीत्वारिपुदेशोत्क्षिपेत् या
वद्द्विषञ्जपेत् सोचिरेणसमाह्वानस्यतेविभीतकतरुमष्टप्रादेशमात्रंदंडंधारय
न् यन्नाममनसाध्यात्वाजपेत् तस्याचिरेणसमाह्वानस्तम्भर्भवति नित्यंकेवलजप
मात्रेणशत्रोःकुलक्षयोभवति क्षयकुष्ठादिरोगानस्पृशंति सूर्याभिमुखोभूत्वानित्य
मष्टाविंशंजपेत् शत्रुर्महाज्वराभिभूतोभवति अर्कसमिद्भिःअष्टोत्तरशतं तिल
तैलेनाक्तंजुहुयात् शत्रोर्गजतुरंगपुत्रादयोनस्पृशंति गोभूहिरण्यदक्षिणांददा
ति अथमंत्राः यश्चवैविद्विषयस्मान्यादिवैषिचतस्पदी निरस्तैनोव्रजासमाभिःकर्त
रह्णापदीमह्वान् १ ओंयोनःशपादशपतोयश्चनःशपतःशपात् हस्तमिवविश्व
दाभूतमामूह्वादनुशोषय २ ओंयंद्विषोयश्चनोद्वेष्टयाश्चयेश्चनःशपात् भृत
पिष्टमिवहस्तामंतंप्रत्यस्यसमस्त्पवे ३ यश्चसापतःशपतोयश्चजामीशयाति
नः ब्रह्माचयतक्रुद्धःशपात्सर्वंतन्मेध्ययस्पदे ४ सर्वंयश्चासर्वंयश्चयोअस्मान्

© Dharmartha Trust J&K. Digitized by eGangotri

प्र· भिदासति तस्यत्वंभियधिष्ठायययदाविष्टुर्धंतस्थिरः ५ अथपंचमप्रयोगः अभिप्रे
23 हीतिपंचऋग्भिःकृष्णाष्टमीमारभ्ययावदष्टमीपर्यंतंजपेत् ८ शिवलिंगंस्पृष्ट्वाअ
भिचारिककृत्यांनाशयति गजतुरंगाणांमहाव्याधिःप्रणश्यति ईश्वरेणापिरक्षि
तंनशाकाले जानुमात्रोदकेस्थित्वात्रिसंध्यंजपेत् उदकांजलिंअष्टाविंशतिसंख्या
कंयावद्दिष्टपर्यंतंनाम्नासंयुक्तंप्रक्षिपेत् सोचिरेणसमाहृतोभवति रुद्रदेवालये
दक्षिणाभिमुखोभूत्वानित्यमष्टोत्तरशतंजपेत् एकविंशतिदिनानि शत्रुकलत्रा
दयोनश्यंति तिलतंडुलैर्वल्मीकमृत्तिकासमैर्वाहुत्वानैर्मासमेकमष्टोत्तरसहस्रं
हुत्वासकलव्याधिदुःखंहंति महोत्पातशांतिर्भवतिवर्षशतंजीवति गरुडवद्ब
लहयंदक्षिणामुखःग्रामेवारासीरेवा ओंअभिप्रेहिसहस्राक्षंयुक्ताश्वशापथं
रथे शत्रूनन्विछतीकृत्येहकीवाविवतोयहात् १ परिणोहंग्यिशपथाद्दह
नग्निरिवदहंद शत्रूनेवाभिनोजहिदिव्याहस्तामिवाशनिः २ शत्रूनमेप्रोषयशप
थान्हत्याश्चसप्यदोसप्यत् जिह्वाश्चलणाश्चडर्यदः समिद्धंजातवेदमं ३ अस

© Dharmartha Trust J&K. Digitized by eGangotri

पत्नं प्र रक्षान्नः शिवं दत्तिणानस्माधि अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ४ परेहि

कृत्ये मा तिष्ठो विद्धस्येव पदं नय मृगः सहि मृगारि श्रोने त्वा निकर्तुमर्हति ५ अथ

मन्त्रप्रयोगः अग्रासो चौरत्वपे इति पंचऋग्भिः कृष्णाष्टमीमारभ्य तत्पर्व पर्यंतं शा

लितंडुलाज्याक्ता नित्यमष्टसहस्रं जुहुयात् सर्वव्याधिनिवारणं भवति अहरहः

श्रीर्वर्द्धते सर्वत्तद्रवाधानश्यंति सर्वशत्रून्जयति अपमृत्युभूतप्रेतपिशाचादि

ब्रह्मराक्षसयक्षगंधर्वविद्याधरस्कंदग्रहापस्मारादिसमस्तबाधां निवारयंति पू

र्वोक्तप्रयोगेण शत्रुनामयुतेन शत्रुनाशः सर्वरोगान्नाशयंति उन्नरोन्नरमहाह

हिः सर्वशांतिश्च भवति मंत्राः अग्रासेचौरत्वपे विश्वरूपे विनाशिनि जंभिता प्रति

गृह्णा स्वस्वयमादाय चाहुतं १ त्वमिंद्रो यमो वरुणस्त्वमापो ग्निरथानिलः त्वं ब्रह्मा

चैव रुद्रश्च त्वष्टा चैव प्रजापतिः २ आवर्तं धेनिवर्तं धमरत्नवः परिवत्सरा अहोरा

त्राश्चाहाश्चदिशाश्च प्रदिशाश्च मे ३ त्वं वरुणाग्नियमं सोमं त्वमापोश्वरथानिलं अत्रा

स्यपपर्मुंश्चैतानुत्पादयासि चाहुतं ४ येमेदमेदारुगर्भे शयानं धियासहितं प्रकृ

© Dharmartha Trust J&K. Digitized by eGangotri

पु॰ घंतिजद्धैः ऊंभीषाकंनरकंग्रीववद्धाप्सुनात्येवंपुरुषासोयमस्य ५ अथसप्तमप्रयोगः
24 अभ्यक्तेतिपंचऋग्भिः नित्यमष्टोत्तरशतंजपमात्रेणसर्वशत्रुक्षयोभवेत् सर्वह
त्याप्रशांतिर्भवति लवणकार्पासवीजाभ्यांहुताभ्यामष्टसहस्रंजुहुयात् सूर्या
भिमुखोष्टाधिकशतंजपेत् महावृष्टिस्तंभोभवति समुद्रमपिशोषयति पं
चपलानिहिरण्यंदक्षिणा मंत्राः अभ्यक्ताअलंकृताः सर्वेनोमुंचंत्विहिरितेवहजानी
याश्चैवकृत्यानांकर्त्रींहन्त्यायवेनसः १ यथारिहंतिप्रासीनंतथैवेथाप्स्कृतत्वरः
तथात्वयाप्रजावर्यंतस्यनिकृत्यःस्यास्तजंगमं २ उन्निष्टैवपरेहितोज्ञातेचाकिमि
हेच्छ सिग्रीवास्तेकृत्येपादौचाभिकृत्स्यामिनिद्रव ३ स्वायमाःमेतिनोमद्योविम्नचेव
पद्वेधिते नैस्तेनिकृत्यमस्तान्मुग्रेपदिनोजीवपस्यरीन् ४ मास्योछ्विषोद्विपदमोतकिं
चिच्चतप्पदं माज्ञातीनतुजानस्वान्मामावधिप्रतिवेधिनो ५ अथअष्टमप्रयोगः
शत्रूयताप्रहितेतिपंचऋग्भिः तिलतंडुलानाज्याक्तानष्टोत्तरशतंजुहुयात् अष्ट
मासैःश्रीर्वृद्धिर्भवति आयुकामोदूर्वाअष्टोत्तरशतंजुहुयात् अष्टमासेश्रीर्वृ

© Dharmartha Trust J&K. Digitized by eGangotri

द्धिर्भवति आयुःकामोहूर्वाअष्टोत्तरशतंपयसाक्तंजन्मदिनेजुहुयात् अपमृ
त्युंजयतिसर्वपापक्षयोभवति चित्तशांतिर्भवति पलाशाक्तसमैर्हुत्वाब्रह्मते
जोमयंभवति आयुरारोग्यैश्वर्याभिकामीतिलतंडुलद्वयेनाज्याक्तानष्टशतं
हुत्वासप्तमदिवसेआरोग्यंभवति मासेनपरिहार्णेनरक्षासिद्धिर्भवति पापवि
शुद्धिर्भवति अत्यंतचित्तनिर्मलोभवति सर्वग्रहदोषानश्यंति ब्रह्मवृक्षसमि
द्भिस्तत् उसमैर्वागव्येनाक्तैरष्टसहस्रंजुहुयात् सर्वपापक्षयोभवति महा
पातकोपपातकानिनश्यंति मासत्रयंनित्यमष्टोत्तरसहस्रंजुहुयात् ब्रह्मह
त्याशांतिर्भवति स्नानकालेविरुद्धार्यंअघमर्षणात्सर्वपापक्षयोभवति जानु
दघ्नेजलेजपतोभिचारशांतिर्ग्रहशांतिश्चभवति अष्टाविंशतिर्जपेत् कुंकुम
कर्पूरचंदनैःसोदसंयुतंजलेघटेसंस्थाप्य अष्टशतंकूर्चेनस्पृष्ट्वाअभिमंत्रितं
अभिषिंचेत् अभिचारकृत्यांनाशयति ग्रहदोषानश्यंति भूतप्रेतपिशाचापस्मा
रादयोनश्यंति वंध्यापुत्रंलभते कुमारीपतिं कन्यार्थीकन्यांलभते नाभिमात्रे

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ 25

जलेस्थित्वोदयास्तमपर्यंतं जपेत्सहस्रं सप्तदिनादर्वाक् महावृष्टिर्भवति वंज
लसमिद्भिः पयसाक्ताभिरष्टसहस्रं जुहुयात् महावृष्टिर्भवति लवणेन वृष्टि
स्तंभश्च अनेनैव सूक्तेन स्वयंभूलिंगे महापूजां कृत्वा शुद्धतोयेन अभिषेकं कुर्या
त् सप्ताहाद्वृष्टिर्भवति ज्वरदाहपीडोपशमनश्च जायते शनैश्चरेश्वत्थहस्तेसं
स्पृशन् जपेत् आयुरारोग्यमैश्वर्यं भवति ग्रहाणामानुकूल्यं च जायते वर्षश
तं जीवति सर्वविपत्क्षयो भवति गुरुदेवताज्ञानयनदोषानपघ्नंति अपामा
र्गसमिद्भिः सकंटकाभिः गोमूत्राक्ताभिः अष्टशतं जन्मनक्षत्रे हुत्वा ग्रहदोषा
नपघ्नंति अथ मंत्राः शाश्वद्यताप्रहितास्तिमां येनास्मि यथायतः ततस्तथा त्वा तु
देवयो ३ यमं नर्मयिश्वितः एवं त्वं निकृतास्माभिर्ब्रह्मणा देवि सर्वशः यथेत
माश्वितो गत्वायापधीनेवनोजहि २ यथा विद्युद्धतो वृक्ष आमूलादनुशुष्यति
एवं स प्रतिशुष्यतु यो मे पापं चिकीर्षति ३ यो नः स्वोअरणो यश्च निष्ट्यो जिघांस
ति देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म ममांतरं शर्म वर्म ममांतरमवब्रह्महिषोजहि ४

© Dharmartha Trust J&K. Digitized by eGangotri

यथाप्रतिष्ठको भूत्वानमेवप्रतिधावति पापंतमेवधावन्तयोमेपापंचिकीर्षति
५ अथनवमप्रयोगः योमेकरोतिपंचचक्रभिः शनैश्चरदिवसेअश्वत्थवृक्षंसंस्पृ
श्यअष्टोत्तरशतंजपेत् आयुरारोग्यमैश्वर्यंभवति अपमृत्युंजयति जन्मनक्ष
रोहिण्यां
त्रेवाकुलिकोदयेअष्टमराशौ वाविषमघटिकायांअश्लेषनक्षत्रेवासंस्पृश्य नाम
संपुटमेकपंचाशत्तजपंकुर्यात् तीक्ष्णशस्त्रेणछेदयेत् तत्प्रतिकृतिंएवंदशा
हंकुर्यात्शत्रुनाशः यमोपिनरक्षितेशाङ्कः मंत्राः ॐयोमेकरोतिप्रहारेयोगा
रेयोनिवेशने योमेकेशनखेकुर्वरंजनेदंतधावने प्रतिसरप्रतिधावकुमार
इवपितृग्रहान् मूर्धानमेषांस्फोटयवधमेषांकुलहापि २ एतेजनस्यंजसान्तज
वेमध्यमग्रेसदाधियः दुर्मदाअन्तग्रनाशआविधौनाछोचिषाविध्यन्तेतन्वैव
खतस्पसदनेयमस्य २ योनोरायिंडुश्चरितासोअग्नेज्जुहुर्मन्तीसोग्नन्दतेवदंतः
तेषांवदंशघ्नार्विषाजातवेदः शुष्कंनहृतमभिसंदहस्वहृत्स्नवर्णेमरुद्रूपेहृद्
कर्णेभयंकरे देविदेविमहादेविममशत्रून्विनाशय ममशत्रून्विनाशयअव

© Dharmartha Trust J&K. Digitized by eGangotri

पु॰ ब्रह्मद्विषोजहि ।४।५। कुवेरंतेमुखमितिऋक्तत्रणामप्रयोगः अष्टशतेप
26 यसाक्तं तिलतंडुलसंयुक्तंजुहुयात् माहेश्वरसंनिपातज्वराः क्षिप्रंनश्यंतिस
र्यःसुखीभवति अष्टोत्तरसहस्रंतर्पणंकुर्यात् अथवात्रिमधाक्ततिलहोमे
नवासहस्रंगुडूचीसमिद्भिःत्रिमधाक्ताभिर्हवींभिर्होमेनसर्वज्वरशांतिर्भवति
पलत्रयंसुवर्णंदक्षिणा मंत्राः ॐकुवेरंतेमुखंरौद्रंनंदिमानंदिमावह ज्वरंम
त्सभयंघोरंविघ्नंनाशयमेज्वरः १ एवंशोषयमारयस्वाहाअवब्रह्मेति पादंसु
विर्भूत्वात्रिसहस्रंत्रिपक्षंजपेत् सर्वपापैःप्रमुच्यते सर्वंशुभमवाप्नोतिसर्वा
न्शत्रून्जयति जितेंद्रियोहविष्याशीलक्षंजपेत् अष्टमहासिद्धिर्भवति अने
नान्नमभिमंत्र्यभुंजीतसर्वंविषमयंहंति समाहितमनाभूत्वालक्षंजपेत्
सर्वकृत्योच्छेदः शांतिश्चायुरारोग्यमवाप्नोति दूर्वयापंचामृतसंयुक्तयाल
क्षंजुहोतिमृतोपिजीवतिराजयक्ष्मादयोरोगाविलयंयांति कालज्वरमहा
ज्वरशीतज्वरसर्वज्वरनिवृत्तिर्भवति महादाहोपशांतिर्भवति भूतप्रेतपि

© Dharmartha Trust J&K. Digitized by eGangotri

शाचादिवाप्यानश्यंपंति दष्टिदोषानश्यंति लहंतिलहोमेमहापातकप्रायश्चित्तंभ
वति यएवंमंत्रंदशलक्षंजपेदाज्येनहोमंकुर्यात् अष्टौमहासिद्धयोभवंति इंद्रा
दीन्वंईशायति यंयंकामंकामयतेतंतमाप्नोति यएनंमंत्रंजपेद्बहुतलक्षंब्रह्मा
परोक्षंभवतिब्रह्मपरोक्षंभवतीत्याहृतः पिप्पलादशौनकौ मंत्रस्तक्रगणाज
पेषु स्माचेतयोःशांतिंपठेत् शौनकोमंत्रः अवब्रह्मेत्यथर्वीऋषिः एकपदागा
यत्रीछंदः ह्याकृत्यादेवता वृंवीजं अंशक्तिः ॐकीलकं चतुर्विधपुरुषार्थसि
ध्यर्थेजपेविनियोगः मंत्रः ॐअवब्रह्मद्विषोजहि अथकृत्योत्पादनमंत्रः ॐक्रां
नमः अंगुष्ठाभ्यांनमः ॐक्रींनमः तर्जनीभ्यांनमः ॐक्रूंनमः मध्यमाभ्यांनमः
ॐक्रैंनमः अनामिकाभ्यांनमः ॐक्रौंनमः कनिष्ठिकाभ्यांनमः ॐक्रः नमः क
रतलकरपृष्ठाभ्यांनमः एवंहृदयादिन्यासः घट्फट्जहीत्यस्यमंत्रस्यअंगिरा
ऋषिः कृत्यादेवता अनुष्टुप्छंदः कृत्योत्पादननिमित्तेजपेविनियोगः ॐख
ट्फट्जहिमहाकृत्येविधूमाग्निसमप्रभे जहिशत्रूंस्त्रिशूलेनकुरुस्वपिवशो

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ णितं १ जपसंख्याश्रयुतमेकंमालामंत्रंजपित्वा सर्वत्रजपहोमाद्यंनेप्रत्यंगिरास्तो
त्रंपठेत् आत्मरक्षानंतरम् कलशोपरिप्रतिमायांपूजांकृत्वा आवाहनादिषोड
शोपचारैःपूजयेत् ॐह्रींयांकल्पयंतिनोरयःक्रूरांकृत्यांवधूमिव तांब्रह्मणा
अपनिर्णुद्मः प्रत्यक्कर्तारमृच्छतु ह्रीं ॐ श्रीप्रत्यंगिरायैनमः मंत्रपुष्पांजलिंस
मर्पयामि यथाशक्त्याषोडशोपचारैःपूजनविधौपरिपूर्णमस्तु तत्रशांति
पाठः ॐशंनोनिगणस्यब्रह्मासोमोभिः संहृतिःसर्वाणिछंदांसि ॐभूः ॐभुवः
ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधि
योयोनःप्रचोदयात् ॐआपोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरों ॐशांताद्यौःशां
तापृथिवीशांतमिदमुर्वं १ अंतरिक्षंशांतमुदन्वतीरापःशांतानःसंत्वोषधीः
शांतानिपूर्वरूपाणिशांतंनोस्तुकृताकृतं शांतंभूतंचभव्यंचसर्वमेवशम
स्तुनः इयंयापरमेष्ठिनीवाग्देवीब्रह्मसंशिता ययैवससृजेघोरंतयैवशांतिर
स्तुनः इदंयत्परमेष्ठिनंमनोवांब्रह्मसंशितं येनैवससृजेघोरंतेनैवशांति

© Dharmartha Trust J&K. Digitized by eGangotri

रस्तुनः इमानियानिपंचेंद्रियाणिमनः षष्ठानिमेहृदिब्रह्मणासंशितानि यैरेवस
सृजेघोरंतैरेवशांतिरस्तुनः शंनोमित्रः शंवरुणः शंविष्णुः शंप्रजापतिः शंनइंद्रो
बृहस्पतिः शंनोभवत्वर्यमा शंनोमित्रः शंवरुणः शंविवस्वांछमंतकः उत्पाताः
पार्थिवांतरिक्षाछंनोदिविचराग्रहाः शंनोभूमिर्वेप्यमानाः शमुल्कानिर्हतं च य
त् शंगावोलोहितःक्षीराः शंभूमिरवतीर्यतीः नक्षत्रमुल्काभिहतंशमस्तुनः शं
नोभिचराः शमुसंतुकृत्याः शंनोनिखाताबल्गाः शमुल्कादेशोपसर्गाः शमुनो
भवंतु शंनोग्रहाश्चांद्रमसाः शमादित्यः शराहुणा शंनोमृत्युर्धूमकेतुः शंरुद्रास्ति
ग्मतेजसः शंरुद्राः शंवसवः शमादित्याः शमग्नयः शंनोमहर्षयोदेवाः शंदेवाः
शंबृहस्पतिः ब्रह्मप्रजापतिर्धातालोकावेदाः सप्तऋषयोग्नयः तैर्मेकृतंस्वस्त्यय
नमिंद्रोमेशर्मयछतुब्रह्मामेशर्मयछंतु विश्वेमेदेवाःशर्मयछंतुसर्वेमेदेवाः
शर्मयछंतु यानिकानिचिछांतानिलोकेसप्तर्षयोविदुः सर्वाणिशंभवंतुमेशंमे
अस्त्वभयंमेअस्तुपृथिवीशांतिरंतरिक्षंशांतिर्द्यौः शांतिरापः शांतिरोषधयः शां

© Dharmartha Trust J&K. Digitized by eGangotri

पु॰

28

तिर्वनस्पतयः शांतिर्विश्वे मे देवाः शांतिः सर्वे मे देवाः शांतिः शांतिः शांतिः शांतिभिः
ताभिः शांतिभिः सर्वशांतिभिः शमयामोऽहं यदिह घोरं यदिह क्रूरं यदिह पापं तच्छां
तं तच्छिवं सर्वमेव शमस्तु नः १४ शंनो देवीरभिष्टय आपो भवंतु पीतये शंयोर
भिस्रवंतु नः १ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा अग्निं च विश्वशंभवं २
आपः पृणीत भेषजं वरूथं तन्वे ३ मम ज्योक्च सूर्यं दृशे ४ शन्न आपो धन्वन्याः
५ शमु संत्वनूप्याः शन्नः खनित्रिमा आपः शमु याः कुंभ आभृताः शिवा नः संतु वा
र्षिकीः ॐ शन्न इंद्राग्नी भवतामवोभिः शन्न इंद्रावरुणा रातहव्या शमिंद्रासोमा सु
विताय शंयोः शन्न इंद्रापूषणा वाजसातौ शंनो भगः शमु नः शंसो अस्तु शन्नः पुरं
धिः शमु संतु रायः शन्नः सत्यस्य सुयमस्य शंसः शन्नो अर्यमा पुरुजातो अस्तु शन्नो
धाता शमु धर्ता नो अस्तु शंन उरूची भवतु स्वधाभिः शंरोदसी बृहती शन्नो अद्रिः
शंनो देवानां सुहवानि संतु शन्नो अग्निर्ज्योतिरनीको अस्तु शन्नो मित्रावरुणावश्वि
ना शं शंनः सुकृतां सुकृतानि संतु शंन इषिरो अभिवातु वातः शंनो द्यावापृथिवी

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वहूतौ शमंतरिक्षं दृशये नो अस्तु शंनओषधीर्वनिनो भवंतु शंनो रजसस्पतिरस्तु
जिष्णुः १ शंनइंद्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः शंनो रुद्रो रुद्रेभिर्ज
लाषः शंनस्त्वष्टाग्नाभिरिह शृणोतु शंनः सोमो भवतु ब्रह्म शंनश्शंनो ग्रावाणः शमु सं
तु यज्ञाः शंनः स्वरूणां मितयो भवंतु शंनः प्रस्वः ३ शमस्तु वेदिः शंनः सूर्य उरुचक्षा उ
देतु शन्नो भवंतु प्रदिशश्चतस्रः शंनः पर्वता ध्रुवयो भवंतु शंनः सिंधवः शमु संत्वापः
शंनो अदितिर्भवतु व्रतेभिः शंनो भवतु मरुतः स्वर्काः शन्नो विष्णुः शमु पूषा नो अस्तु
शंनो भवित्रं शमस्तु वायुः शंनो देवः सविता त्रायमाणः शन्नो भवंतूषसो विभातीः
शंनः पर्जन्यो भवतु प्रजाभ्यः शंनः क्षेत्रस्य पतिरस्तु शंभुः २ शंनो देवा विश्वदेवा भवं
तु शंसरस्वती सह धीभिरस्तु शमभिषाचः शमु रातिषाचः शंनो दिव्याः पार्थिवाः शंनो
अप्याः शंनः सत्यस्य पतयो भवंतु शन्नो अर्वंतः शमु संतु गावः शन्न ऋभवः सुकृतः सु
हस्ताः शन्नो भवंतु पितरो हवेषु शंनो अज एकपाद्देवो अस्तु शमहिर्बुध्न्यः ३ शंसमु
द्रः शन्नो अपांनपात्पेरुरस्तु शन्नः पृश्निर्भवतु देवगोपाः आदित्या रुद्रा वसवो जुषंता

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ मिदंब्रह्मक्रियमाणंनवीयःशृण्वंतुनोदिव्याः पार्थिवासोगोजाताउतयेयज्ञियासः ये
२१ देवानामृत्विजोयज्ञियासोमनोर्यजत्राअमृताऋतज्ञाः तेनोरासंतामुरुगायमद्ययू
यंपातस्वस्तिभिःसदानः २ तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्त
मशीमहिगाधमुतप्रतिष्ठानमोदिवेबृहतेसादनाय शंनोवातोवातुशन्नस्तपतुसू
र्यः अहानिशंभवंतुनः शंरात्रीप्रतिधीयतांशमुषानोव्युछतु उषाअपःस्वसुस्तमः
संवर्तयतिवर्तनिंसुजाततत अयावाजंदेवहितंसनेममदेमशतहिमाःसवीराः
ततोजपमारभेत् ॐयांकल्पयंतीत्येकर्चस्यप्रत्यंगिराऋषिः कृत्योद्वेषणीदेवता अ
नुष्टुप्छंदः जपेविनियोगः ततोक्रारीत्यादिषडंगंकृत्वा मूलमंत्रंयथाशक्तिजपेत्
तद्यथा ॐह्रींयांकल्पयंतिनोरयः क्रूरांकृत्यांवधूमिव तांब्रह्मणाअपनिर्णुद्मःप्र
त्यक्कर्तारमृच्छतुह्रींॐ गुह्येति जपंनिवेद्य अनेनजपकर्मणाकृतेनश्रीप्रत्यंगिरा
देवताप्रीयतां अद्याश्रीतिथौ अमुकगोत्रः अमुकशर्माहंममसकुटुंबस्यसपरिवा
रस्यआयुरारोग्यैश्वर्याभिवृद्ध्यर्थंप्रत्यंगिरास्तोत्रपाठमहंकरिष्यामि तथाचस्तोत्रं

© Dharmartha Trust J&K. Digitized by eGangotri

अथप्रत्यंगिरास्तोत्रमंत्रस्या गिराऋषि रनुष्टुप्छंदः प्रत्यंगिरादेवता स्तुतौवि
नियोगः सर्वत्रजपहोमांतेस्तोत्रमंत्रेणभगवती प्रत्यंगिरांपुष्पांजलिनापूजये
त् ॐक्रांनमः अंगुष्ठाभ्यांनमः ॐक्रींनमः तर्जनीभ्यांनमः ॐक्रूंनमः मध्यमा
भ्यांनमः ॐक्रैंनमः अनामिकाभ्यांनमः ॐक्रौंनमः कनिष्ठिकाभ्यांनमः ॐक्रः
नमः करतलकरपृष्ठाभ्यांनमः एवंहृदयादि ॐक्रांनमः हृदयायनमः ॐक्रीं
नमः शिरसेस्वाहा ॐक्रूंनमः शिखायैवषट् ॐनमः क्रैंकवचायहुं ॐक्रौंनमः
नेत्रत्रयायवौषट् ॐक्रःनमः अस्त्रायफट् अथस्तोत्रध्यानम् कृष्णवर्णांहृहृद्
पीरक्तकेविनमूर्द्धजा शिरःकपालमालांचविकेशीघूर्णितानना रक्तनेत्राम
तिक्रुद्धांलंबजिह्वामयोमुखी दंष्ट्राकरालवदनांनेत्रभ्रुकुटिलेक्षणां ऊर्द्ध्वदक्षि
णहस्तेनबिभ्रतीचपरश्वधं अधोदक्षिणहस्तेनबिभ्राणांशूलमूर्द्ध्वगं तथोर्द्ध्ववा
महस्तेनधारयंतीतथांकुशं अधोवामकरेणाथबिभ्राणांपाशमेवच एवंध्या
त्वामहाकृत्यांस्तोत्रमेतदुदीरयेत् तथाहि ईश्वरउवाच नमःप्रत्यंगिरेदेविप्र

प्र.
निकृलविद्यातिनि नमःसर्वगतेशुभांते परचक्रविमर्द्दिनि नमःसर्वप्रदेसौम्येपरवं
धविदारिणि नमोजगत्त्रयाधारेपरमंत्रविदारिणि नमःपरात्परेसौम्येपरतंत्रप्र
30 मूर्णिनि नमस्तेचंडिकेचंडिमहामहिषमारिणि नमःकालिमहालक्ष्मिशुंभदे
हविदारिणि नमोब्रह्माणिदेवेशिरक्तबीजनिपातिनि नमःकौमारिवैकुंठेपर
दर्पनिसूदिनि नमोवाराहिवैंद्राणिपरेनिर्वाणदायिनि नमस्तेदेविचामुंडेचंडमु
डविदारिणि नमोमातर्महालक्ष्मिसंसारार्णवतारिणि निशुंभदैत्यसंहारिका
लांतकेनमोस्तुते श्रीप्रत्यंगिरायैनमः प्रथमपुष्पांजलिंसमर्पयामि ॐनमः
कुसुमांवरशोभितेसकलसेवकजनोपद्रवकारकदुष्टग्रहराजचेटासंघदहसं
हारिणि अनेकसिंहकोटिचारिणिकालांतकेनमोस्तुते श्रीप्रत्यंगिरायैनमः
द्वितीयपुष्पांजलिंसमर्पयामि ॐदुर्गेसहस्रवदनेऽष्टादशभुजलताभूषिते
महाबलपराक्रमेऽत्यद्भुतेऽपराजितेदेविप्रत्यंगिरे सर्वातिशायिनिपरकर्म
विध्वंसिनिपरयंत्रमंत्रतंत्रप्रहूर्णादिप्रयोगकृतवशीकरणस्तंभनजृंभणा

© Dharmartha Trust J&K. Digitized by eGangotri

दिकदोषनिचयोछ्छेदिनि सर्वग्रहोच्चाटिनि मारिणि मोहिनि वशीकारिणि स्तंभि
निजंभिणि आकर्षणि ग्रंथकारिणि सर्वदेवताग्रह योगिनीग्रह दानवग्रह दैत्यग्र
ह राक्षसग्रह ब्रह्मराक्षसग्रह सिद्धग्रह यक्षग्रह गुह्यग्रह विद्याधरग्रह किंनर
ग्रह गंधर्वग्रहाप्सरोग्रह भूतग्रह प्रेतग्रह पिशाचग्रह कूष्मांडग्रह गजादिक
ग्रह पूतनाग्रह मातृग्रह पितृग्रह वेतालग्रह शत्रुग्रह राजग्रह चोरग्रह मंत्र
ग्रहाश्वदेवताग्रह गोत्रदेवता ग्रहापिग्रह व्याधिग्रहापस्मारग्रह नाकग्रह गल
ग्रहालकग्रह याम्यग्रह डामरिकाग्रहोदकग्रह विचोरग्रह रात्रिग्रह छायाग्रह शा
ल्यग्रह सर्पग्रह विशाल्यग्रह कालग्रह सर्वदोषग्रह विद्राविणि सर्वदुष्टभक्षि
णि सर्वपापनिषूदिनि सर्वयंत्रस्फोटिनि सर्वशृंखलात्रोटिनि सर्वमुद्राविद्रा
विणि ज्वालाजिह्वे विकरालवक्त्रे रौद्रमूर्ते देवि प्रत्यंगिरा सर्वं देहि यशो देहि पु
त्रान्देह्यारोग्यं देहि भुक्तिमुक्त्यादिकं देहि सर्वसिद्धिं देहि मम सपरिवारं रक्ष रक्ष
पूजाजपहोमध्यानार्चनादिकं कृतं न्यूनमधिकं वा परिपूर्णं कुरु कुरु स्वभिमु

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·

३१ त्वीभवभवत्तमस्वापराधं श्रीप्रत्यंगिरायै· तृतीयपुष्पां· पवंस्तुतामहालक्ष्मीःशिवे
न परमात्मना उवाचेदं प्रत्यक्षांगी पृच्छ एष परमेश्वरि प्रत्यंगिरास्तोत्रं ये पठंति हि
जोन्नमाः ष्ट एवं तःस्थापयेन्तश्च तेषां सिद्धिप्रदापयेत् श्रीश्चऊह्रीमहाऊह्रीकालि
31 कागुह्यकालिका त्रिपुरात्वरितानित्यात्रैलोक्यविजयाजया जितापराजितादेवीज
यंतीभद्रकालिका सिद्धलक्ष्मीर्महालक्ष्मीःकालरात्रिनमोस्तुते श्रीप्रत्यंगिरायै·
चतुर्थपुष्पांजलिः कालीकरालविक्रांतेकालिकेपापहारिणि विकरालमुखेदेविज्वा
लामुखिनमोस्तुते श्रीप्रत्यंगिरायैनमः पंचमपुष्पांजलिंसमर्पयामि पंचपुष्पांजल
यःप्रत्यंगिरायैनिवेदयेत् ॐनक्षत्रेभ्योराहवणीमहेगातुंयज्ञायगातुं यज्ञपतयेदैवीस्व
स्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्ध्वंजिगातुभेषजंशंनोअस्तुद्विपदेशंचतुष्पदे उ
तिष्ठचंद्ररूपदयमन्वालभ्यदशावारंजपति ॐशांतिःशांतिःशांतिः नतिथिर्नचन
क्षत्रंनग्रहोनचचंद्रमाः अथर्वमंत्राःसंप्राप्ताःसर्वासिद्धिर्भविष्यति ॥ इति ॥ प्रत्य
ङ्गिरा स्तुति विधानं समाप्तम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५६३२-च
सुन्दरीकवचम् प्रत्यङ्गिरा सूक्तविधानम् (तन्त्रम्)
पत्राणि ३१ (सम्पूर्णम्)

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri